## सङ्घोद्घौ गणप्रशंसयोः। (८६/३२६४)

[1]सम्‌उदोः उपपदयोः हन्तेः [2]धातोः अप् प्रत्ययो भवति, टिलोपः घत्वं च निपात्यते, यथासङ्ख्यं गणे[3]ऽभिधेये, प्रशंसायां[4] गम्यमानायाम्। सङ्घः पशूनाम्। उद्घो [5]मनुष्यः। [6]गणप्रशंसयोः इति किम्? सङ्घातः[7]॥

## निघो निमितम्। (८७/३२६५)

[8]निघः इति निपूर्वाद् [9]हन्तेः अप् प्रत्ययः, टिलोपो घत्वं च निपात्यते, निमितं चेदभिधेयं भवति। समन्तात् मितं निमितम्, [10]समारोहपरिणाहम्। निघाः वृक्षाः। निघाः शालयः। निमितम् इति किम्? निघातः॥

## ड्वितः क्त्रिः। (८८/३२६६)

भावेऽकर्तरि च कारके इति वर्तते। डु इत् यस्य[11] तस्माद् ड्वितो [12]धातोः क्त्रिः प्रत्ययो भवति। 'त्रेर्मम् नित्यम्' (४.४.२०/१५७०) इति [13]वचनात् केवलो न प्रयुज्यते। 'डुपचष् पाके' (धा.पा.९९७) – [14]पक्त्रिमम्। 'डुवप् [15]बीजसन्ताने' (धा.पा.१००४) – उप्त्रिमम्। डुकृञ् – कृत्रिमम्॥

## ट्वितोऽथुच्। (८९/३२६७)

[16]टु इत् यस्य, तस्मात् [17]ट्वितो धातोः अथुच् प्रत्ययो भवति भावादौ। 'टुवेपृ कम्पने' (धा. पा. ३६७) – वेपथुः। 'टुओश्वि गतिवृद्ध्योः' (धा. पा. १०११) – श्वयथुः। 'टुक्षु शब्दे' (धा.पा.१०३७) – क्षवथुः[18]॥

## यजयाचयतविच्छप्रच्छरक्षो नङ्। (९०/३२६८)

[19]भावे अकर्तरि च कारके इति वर्तते। यजादिभ्यो धातुभ्यो नङ प्रत्ययो भवति। ङकारो गुण[20]-प्रतिषेधार्थः। यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। रक्ष्णः। प्रच्छेः असम्प्रसारणं ज्ञापकात् 'प्रश्ने चासन्नकाले' (३.२.११७/२७७७) इति॥

## स्वपो नन्। (९१/३२६९)

[21]स्वपेर्धातोः नन् प्रत्ययो भवति। [22]नकारः स्वरार्थः (६.१.१९७/३६८६)। [23]स्वप्नः॥

---

1. हन इति वर्तते इत्यधिकम् ब. 2. धातोः नास्ति फ. 3. अभिधेये नास्ति फ. 4. च इत्यधिकम् फ. 5. मनुष्याणाम् अ. ब. क. फ. 6. °प्रशंसायाम् ह. 7. उद्घातः इत्यधिकम् अ. क. फ. 8. हन इति वर्तते इत्यधिकम् ब. ग. 9. हन्तेरपि टिलोपः ह, हनेरपि ब. 10. समारोहः परिणाहः ड. 11. सोऽयं ड्वित् इत्यधिकम् ह. 12. धातोः नास्ति फ. 13. वचनात् नास्ति ब. 14. तेन निर्वृत्तं इत्यधिकम् अ. फ. ह, पाकेन निर्वृत्तं इत्यधिकम् ब. ड. 15. बीजतन्तुसन्ताने ब. 16. भावेऽकर्तरि च कारके इति वर्तते इत्यधिकम् ब. 17. ट्वितो नास्ति ब. 18. टुदु उपतापे दवथुः इत्यधिकम् अ. ब. ड. 19. वाक्यमिदं नास्ति फ. 20. वृद्धि इत्यधिकम् अ. ब. क. ड. 21. भावेऽकर्तरि च कारके इति वर्तते इत्यधिकम् ब. ह. 22. नः स्वरार्थः अ. 23. स्वप्नः नास्ति ह.